संस्कृत-वार्ता:

दिनाङ्क : 18/11/2025 सायम् - 06:20

आदौ मुख्यवार्ता:

- राष्ट्रपतिः द्रौपदी मुर्मू-वर्या जलसुरक्षायै प्रयत्नानां आवाहनम् अकरोत्; षष्ठं राष्ट्रियजलपुरस्कारञ्च प्रदत्तवती; महाराष्ट्रः प्रथमस्थानं प्राप्नोत्।
- आन्ध्रप्रदेशे संघट्टे माड़वी हिड़मा इत्यनया सह षट् माओवादिनः मारिताः।
- रक्तदुर्ग विस्फोटन-प्रकरणसन्दर्भे दिल्ल्यां अल्-फलाह्-समूहेन सम्बद्धेषु पञ्चविंशति स्थलेषु प्रवर्तननिदेशालयेन निरीक्षणं विहितम्।
- भारतम्, विकसितदेशानां आवाहनमकरोत् यत् ते जलवायु-परिवर्तनमुद्दिश्य आधिक्येन सहयोगं कुर्युरिति।
- बहिष्कृतायाः बाङ्ग्लादेशस्य प्रधानमन्त्री शेख् हसीना इत्यस्याः मृत्युदण्डस्य संयुक्तराष्ट्रसङ्घः विरोधम् अकरोत् ।

अथ वार्ता: विस्तरेण

राष्ट्रपति जलशक्तिः

अद्यत्वे जलवायु-परिवर्तनेन जलचक्रे अपि प्रभावः भवतीति अवधानं कृत्वा, राष्ट्रपतिः द्रौपदी मुर्मू इत्येषा जलस्य लभ्यतां सुरक्षाञ्च करणाय सर्वान् मिलित्वा कार्यं कर्तुम् आग्रहम् अकरोत्। नवदेहल्यां षष्ठं राष्ट्रियजलपुरस्कारं 2024 अथ प्रथमम् जल-पञ्चायत्-जनभागीदारी इति पुरस्कारान् च ददन्ती राष्ट्रपतिः अवदत् यत् देशे जलस्य कुशलप्रयोगः आवश्यकः अस्ति, यतो हि जनसङ्ख्यायाः दृष्ट्या जलसम्पदः परिमिताः सन्ति। सा पुरस्कारविजेतृभ्यः जलसंरक्षणार्थं कृतप्रयासानां कृते धन्यवादान् दत्तवती। गतवर्षे प्रारब्धस्य जलसंरक्षण-जनसहभागित्वकार्यक्रमान्तर्गतं सार्धत्रिमिलियनाधिकाः भूजल-पुनर्भरण-संरचनाः निर्मिताः इति राष्ट्रपतिः अवधानं दत्तवती।

अस्मिन् कार्यक्रमे सम्बन्धितमन्त्रिणः अपि उपस्थिताः आसन्।

आन्ध्र-माओवादिनः

माओ-विरोधी-कार्येषु महत्त्वपूर्णविकासरूपेण आन्ध्रप्रदेशस्य अल्लूरी-सीता-रामराजू-मण्डलस्य आन्ध्र-छत्तीसगढ-ओडिशा-त्रि-सन्धिस्थल-समीपे मेरेडुमिल्ली-वनेषु प्रातः शीर्षसेनापतिना माड़वी हिड्मया सह षट् माओवादिनः मारिताः। आन्ध्रप्रदेशस्य पुलिस-महानिदेशकः हरीशकुमारगुप्तः अवदत् यत् समूहस्य सञ्चरणविषये विश्वसनीयसूचनाः प्राप्य सङ्घट्टः अभवत्। सः इत्यपि अवदत् यत् अभियानकाले कोऽपि सुरक्षाकर्मचारी व्रणितः न अभवदिति।

ईडी फ़लाह समूहः

ई. डी. इत्याख्य: प्रवर्तन-निदेशालयः, अद्य दिल्ली-क्षेत्रे अल्-फलाह्-समूहेन सम्बद्धेषु पंचविंशतितः अधिकेषु परिसरेषु अन्वेषणम् अकरोत्। अन्वेषणोपक्रमः रक्तदुर्गस्फोटेन सह वित्तीय-अनियमितताभि: सम्बद्धमस्ति।

प्रधानमन्त्रिणः-लेखः

प्रधानमन्त्री नरेन्द्रमोदी अद्य केन्द्रीयमन्त्रिणः भूपेन्द्र-यादवस्य लेखं समुल्लेखयन् बृहत्तरपारदर्शितया सामान्यमानकैश्च सह वैश्विक-जलवायु-चक्रस्य पुनर्निर्माणाय भारतीय अवसरान् अधोरेखितवान्। सामाजिक-प्रसार-माध्यमे, प्रधानमन्त्री अलिखत् यत्, भारतस्य जलवायु-वित्त-वर्गीकरणस्य प्रारूपं, तस्य वर्धमान-देशीय-हरित-वित्तं च व्यावहारिक-नेतृत्वस्य उदाहरणरूपेण कार्यं करोति, भविष्ये च अधिकप्रभावशाली-वैश्विक-संरचनायाः मार्गदर्शने साहाय्यं कर्तुं शक्नोति। तेनोक्तं यत्, विकसितदेशा: जलवायु-परिवर्तनमुद्दिश्य आधिक्येन सहयोगं कुर्युरिति।

विराम

संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रम: आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय-तन्त्रांशे अपि उपलब्धो भविष्यति।

प्रधानमन्त्रिणः आन्ध्र-तमिलनाडु यात्रा.

प्रधानमन्त्री नरेन्द्रमोदी श्वः आन्ध्रप्रदेशस्य तमिळुनाडुराज्यस्य च यात्रायां भविष्यति। आन्ध्रप्रदेशस्य प्रवासे श्रीमोदी पुट्टापर्थि श्रीसत्यसायि बाबा इत्यस्य महासमाधिं गत्वा प्रणामं करिष्यति। तस्य सम्मानार्थं स्मारकमुद्रां, मुद्रापत्राणां समुच्चयं च लोकार्पयिष्यति। कार्यक्रमावधौ प्रधानमन्त्री सभामपि सम्बोधयिष्यति। पश्चात् सः तमिळुनाडुराज्यस्य कोयम्बत्तूर-नगरं गत्वा दक्षिणभारत-प्राकृतिक-कृषि-शिखरसम्मेलनम् इत्यस्य उद्घाटनं करिष्यति। कार्यक्रमावसरे, श्रीमोदी पी. एम.-किसान इत्यस्य एकविंशतितमं पुटकमपि वितरिष्यति।

सोनभद्र अद्यतनम्

उत्तरप्रदेशस्य सोनभद्र-जनपदस्य बिलही-मार्कुण्डी इति कृष्णाङ्गारतः अद्यपर्यन्तं आहत्य सप्त शवानि प्राप्तानि सन्ति। सर्वाणि मृतशरीराणि अभिज्ञातानि सन्ति, सप्तसु षट् शवाश्च दाहिताः। आकाशवाण्या सह वार्तालापं कुर्वन् मण्डल-दंडाधिकारी श्रीबी. एन. सिङ्हः अवदत् यत् दुर्घटनायां पीडितानां परिवाराणि केन्द्र-राज्य-सर्वकारयोः साहाय्यं प्राप्स्यन्तीति। यद्यपि उद्धारण-संस्थाः उद्धारकार्यस्य परिपूरणं कृतवत्यः तथापि स्थलस्य द्वितीय-निरीक्षणानन्तरमेव तत् समाप्तं भविष्यति।

बिहार-सर्वकारः

बिहार-राज्ये एन. डी. ए-पक्षस्य नवनिर्वाचित-विधायकाः श्वः पटना-नगरे मिलित्वा स्वनेतृत्वं निर्वाचयिष्यन्ति। भाजपा, जनता-दल-संयुक्तः, लोक-जनशक्ति-पार्टी (रामविलास), इति हिन्दुस्तानी-आवामी-मोर्चा, राष्ट्रिय-लोक-मोर्चा इत्येतासां पञ्च-घटक-दलानां द्व्यधिकद्विशत एन. डी. ए. विधायकाः सभायां भागं ग्रहीष्यन्ति। मुख्यमन्त्री नीतीशकुमारः पुनः बिहारराज्ये एन. डी. ए. विधायक-दलस्य नेतृत्वेन निर्वाचितः भवितुम् अर्हति। ततः एन. डी. ए. विधायक-दलस्य नेता राज्ये नूतनं शासनं निर्मास्यति।

अन्ताराष्ट्रिय-गीता-महोत्सवः 2025

अस्य वर्षस्य अन्ताराष्ट्रिय-गीता-महोत्सवस्य भागरूपेण, भारतीय-दूतावासेन "अद्यतनविश्वे भगवद्गीतायाः प्रासङ्गिकता" इति विषये चर्चा सत्रस्य आयोजनं कृतम्। नेपालदेशस्य एस. वी. सी. सी. इत्यस्य छात्राः शिक्षकाश्च भगवद्गीतायाः विषयैः प्रेरिताः सांस्कृतिकनृत्यं सङ्गीतप्रदर्शनं च

कृतवन्तः। उत्सवोऽयं सप्ताहपर्यन्ताय भवति अस्मिन् वर्षे दिसम्बर-मासस्य प्रथम-दिनाङ्कतः गीता-जयन्तीति दिवसादारप्स्यते। एतत् मुख्यतया हरियाणा-राज्यस्य कुरुक्षेत्रे आचर्यते। भगवद्गीता भगवतः कृष्णेन कुरुक्षेत्रे अर्जुनाय प्रदत्तेति मन्यते। श्रीमद्भगवद्गीता प्राचीनकालादारभ्य हिन्दूधर्मावलम्बीनां दार्शनिक-मार्गदर्शकः आध्यात्मिक-शिक्षाप्रदश्च ग्रन्थः अस्ति।

संयुक्त राष्ट्र-हसीना -प्रकरणम्

संयुक्तराष्ट्रसङ्घस्य महासचिवः आन्टोनियो गुट्टरसः बाङ्ग्लादेशस्य बहिष्कृतप्रधानमन्त्रिणः शेख हसीना इत्यस्याः मृत्युदंडस्य विरोधम् अकरोत्। संयुक्तराष्ट्रसङ्घस्य प्रमुखस्य प्रवक्ता स्टीफ़न् दुजारिक् इत्येषः स्वस्य दैनिक-वार्ताहर-सम्मेलनावसरे अवदत् यत्, संयुक्तराष्ट्रसङ्घः सर्वविध परिस्थितिषु मृत्युदण्डप्रयोगं विरुध्य वर्तते इति। अष्टसप्तति-वर्षीयराजनेत्रीं विरुध्य तस्याः अनुपस्थितौ ढाका-नगरे देशस्य अन्ताराष्ट्रिय-अपराध-न्यायाधिकरणेन गतवर्षे छात्र-नेतृत्वस्य विरोध-प्रदर्शनावसरे कथित-अपराधाणां विषये विचारितः आसीत्। सा सम्प्रति निर्वासने निवसन्ती अस्ति। प्रवक्त्रा संयुक्तराष्ट्रसङ्घस्य मानव-अधिकार-उच्चायुक्तस्य वोल्कर् टर्क् इत्यस्य वक्तव्यम् उद्धृत्य उक्तं यत्, केवलं बाङ्ग्लादेशस्य न्यायाधीशेन निर्मितेन स्थानीय-न्यायालयेन मृत्युदण्डः दत्तः, यस्य नाम अन्ताराष्ट्रिय-अपराध-न्यायाधिकरणमिति आसीत्, येन सा मानवतां विरुध्य अपराधेषु दण्डिता अभवत्।

शेख् हसीना विरुद्ध परीक्षणः

एम्नेस्टी इण्टरनेशनल इति संस्थया बांग्लादेशस्य प्राक्तन गृहमंत्रिणा सह शेख हसीनां विरुध्य गतवर्षस्य छात्र-नेतृत्वस्य विरोधेन सह सम्बद्धानां मानवताविरोधी-अपराधानधिकृत्य तयोरनुपस्थितौ मृत्युदण्डेन दण्डननिर्णयस्य ह्यः निन्दा कृता। एम्नेस्टी इण्टरनेशनल इत्यस्य महासचिवः अग्नॅस कालमाई इत्येषः एकस्मिन् वक्तव्ये उक्तवान् यत् अयं निर्णयः न्यायस्य विफलतायाः प्रतिनिधित्वं करोतीति।

आईसीजी-बाङ्ग्लादेशः

भारतीय-तटरक्षकदलम् भारतीय-जलक्षेत्रे अवैधतया मत्स्यपालनमुद्दिश्य नवसप्ततिः कर्मचारिभिः सह त्रीणि बाङ्ग्लादेशी-मत्स्यनौकायानान्यपि गृहीतवान्।

।। इति वार्ताः ।।